# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| कक्षा-आचार्य(SEM-१)(New&Old) | प्रश्नपत्रम् – 2 | गुणाः –70 |
|---|---|---|
| विषयः – रामानुजवेदान्तः | कोड –C.C.4.1.1 | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –10/10/2019 | सन्दर्भग्रन्थः – श्रीभाष्यम् | |

---

### प्रथमान्वितिः (Unit 1) — गुणाः

**प्रश्न १ कस्यचिदेकस्य सूत्रस्य व्याख्यानं यथाग्रन्थं कुरुत।** ५

१ सर्वप्रसिद्धोपदेशात्।

२ कर्मकर्तृव्यपदेशाच्च।

**प्रश्न २ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ यदि परमात्मा न भोक्ता, एवं तर्हि सर्वत्र भोक्तृतया प्रतीयमानो जीव एव स्यादिति यथाग्रन्थं विशदयत।

२ अन्तर्याम्यधिकरणं स्वसिद्धान्तमनुसृत्य प्रतिपादयत।

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३ कस्यचिदेकस्य सूत्रस्य व्याख्यानं यथाग्रन्थं कुरुत।** ५

१ भेदव्यपदेशात्।

२ सा च प्रशासनात्।

**प्रश्न ४ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ ईक्षतिकर्माधिकरणस्य व्याख्यानं कुरुत।

२ प्रासंगिकदेवताधिकरणस्य व्याख्यानं यथाग्रन्थं विधेयम्।

### तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधस्तनप्रश्नयोरेकस्य प्रश्नस्य व्याख्यातामुत्तरं लिखत।** ५

१  ब्रह्मविद्यायां शूद्रस्याप्यधिकारोऽस्ति न वा इति सविशदं प्रतिपादयत।

२  अव्यक्तशब्देन कथं व्यक्तस्य शरीरस्याभिधानमिति यथाग्रन्थं निराकुरुत।

**प्रश्न ६  कस्याप्येकस्याधिकरणस्य व्याख्यानं विधेयम्।** १०

१  अर्थान्तरत्वादिव्यपदेशाधिकरणम्।

२  कारणत्वाधिकरणम्।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७  कस्यचिदेकस्य सूत्रस्य व्याख्यानं यथाग्रन्थं कुरुत।** ५

१  जगद्वाचित्वात्।

२  अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके।

**प्रश्न ८  एकमेवाधिकरणं यथाग्रन्थं विवेचयत।** १०

१  प्रकृत्यधिकरणम् ।

२  सर्वव्याख्यानाधिकरणम् ।

**प्रश्न ९  दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१  श्रीभाष्यस्य रचयिता कः?

२  किं इह ब्रह्मशब्देन प्रत्यगात्मा निर्दिश्यते उत परमात्मा निर्दिश्यते?

३  जीवात्मा उपास्योऽस्त्युत उपासकोऽस्ति?

४  'अत्ता चराचरग्रहणात्' इत्यत्रात्तापदेन किं ग्राह्यम्?

५  द्वितीयपादे कत्यधिकरणानि सन्ति?

६  द्युभ्वाद्यधिकरणे कति सूत्राणि सन्ति?

७  कर्मफलदाता कः?

८  जीवः नित्य उतानित्यः?

९  जीवः कस्य शरीरमस्ति?

१०  विशिष्टाद्वैतमतस्य समर्थने कः मीमांसितवान्?

११  क्षेत्रज्ञः कः?

१२  जगतो निमित्तकारणं उपादानकारणञ्च किम्?

१३  ब्रह्मसूत्रस्य प्रथमं सूत्रं किम्?

१४ प्रथमाध्यायस्य चरमं सूत्रं किम्?

१५ आनुमानिकाधिकरणे कति सूत्राणि सन्ति?